## मेघर्तिभयेषु कृञः । (४३/२९६०)

मेघ ऋति भय इत्येतेषु कर्मसूपपदेषु [1]कृञः खच् प्रत्ययो भवति । मेघङ्करः[2] । ऋतिङ्करः । भयङ्करः । उपपदविधौ [3]भयादिग्रहणं तदन्तविधिं प्रयोजयति । अभयङ्करः ॥

## क्षेमप्रियमद्रेऽण् च । (४४/२९६१)

क्षेम प्रिय मद्र इत्येतेषु कर्मसूपपदेषु करोतेः[4] अण् प्रत्ययो भवति, चकारात् खच् च । क्षेमकारः, क्षेमङ्करः । प्रियकारः, प्रियङ्करः । मद्रकारः, मद्रङ्करः । वा इति वक्तव्ये पुनरण्ग्रहणं हेत्वादिषु [5]टप्रतिषेधार्थम् ॥

## आशिते भुवः करणभावयोः । (४५/२९६२)

अत्र सुपि इत्युपतिष्ठते । आशितशब्दे सुबन्ते उपपदे भवतेर्धातोः करणे भावे चार्थे खच् प्रत्ययो भवति । आशितो भवति अनेन आशितम्भव ओदनः । भावे – आशितस्य भवनम् [6]आशितम्भवं वर्तते[7] ॥

## सञ्ज्ञायां भृतॄवृजिधारिसहितपिदमः । (४६/२९६३)

[8]कर्मणि इति सुपि इति च प्रकृतं सञ्ज्ञावशाद् यथासम्भवं सम्बध्यते । भृ तॄ वृ जि धारि सहि तपि दम इत्येतेभ्यो [9]धातुभ्यः सञ्ज्ञायां विषये खच् प्रत्ययो भवति । [10]विश्वम्भरा वसुन्धरा । रथन्तरं [11]साम । पतिंवरा कन्या । शत्रुञ्जयो हस्ती । युगन्धरः पर्वतः । शत्रुंसहः । शत्रुंतपः । [12]अरिंदमः । सञ्ज्ञायाम् इति किम् ? [13]कुटुम्बं बिभर्ति इति कुटुम्बभारः[14] ॥

## गमश्च । (४७/२९६४)

[15]गमेः धातोः [16]सुपि उपपदे सञ्ज्ञायां विषये खच् प्रत्ययो भवति । सुतङ्गमो नाम, [17]यस्य पुत्रः सौतङ्गमिः । योगविभागः उत्तरार्थः ॥

## अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः । (४८/२९६५)

सञ्ज्ञायाम् इति नानुवर्तते । [18]अन्त अत्यन्त अध्वन् दूर पार सर्व अनन्त इत्येतेषु कर्मसूपपदेषु [19]गमेः डप्रत्ययो भवति । [20]अन्तगः । अत्यन्तगः । अध्वगः । दूरगः । पारगः । सर्वगः । अनन्तगः । डकारः टिलोपार्थः, डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् [21]इति ॥

---

1. करोतेः धातोः अ. क. फ. 2. वायुः इत्यधिकम् अ. 3. भयार्थादिवार्तिकग्रहणं फ. 4. धातोः इत्यधिकम् अ. क. फ. 5. टप्रत्ययप्रतिषेधार्थम् अ. फ. 6. आशितंभवो वर्तते क. फ. ह. 7. भावे इदमुदाहरणम् इत्यधिकम् ह. 8. कर्मणि इति सुपीति कृतं ह. फ, कर्मणि सुपीति च कृते क. 9. धातुभ्यः नास्ति फ. 10. विश्वं बिभर्ति इति इत्यधिकम् फ, वसुन्धरा नास्ति ह. 11. गायत्री क. 12. गायत्री क. 13. अरिंदमः नास्ति अ. 14. कुद्दालं बिभर्ति इति कुद्दालभारः क. ड. 15. गमेश्च ह. 16. सुबन्ते उपपदे फ. 17. यस्य सौतंगमिः पुत्रः क. न्या. 18. अन्तादिषु ह. 19. गमेर्धातोः ग.ह. 20. अन्तं गच्छति इत्यधिकम् अ.फ. 21. टेरिति फ.ह.